✧˖°*❋ ❋*°˖✧

# संतान गोपाल स्तोत्रम्

# (Santaan Gopal Stotra)

## in Bangla

## সংতান গোপাল স্তোত্রম্

✧˖°*❋ ❋*°˖✧

# সংতান গোপাল স্তোত্রম্

শ্রীশং কমলপত্রাক্ষং দেবকীনংদনং হরিম্ ।
সুতসংপ্রাপ্তযে কৃষ্ণং নমামি মধুসূদনম্ ॥ 1 ॥

নমাম্যহং বাসুদেবং সুতসংপ্রাপ্তযে হরিম্ ।
যশোদাংকগতং বালং গোপালং নংদনংদনম্ ॥ 2 ॥

অস্মাকং পুত্রলাভায গোবিংদং মুনিবংদিতম্ ।
নমাম্যহং বাসুদেবং দেবকীনংদনং সদা ॥ 3 ॥

গোপালং ডিংভকং বংদে কমলাপতিমচ্যুতম্ ।
পুত্রসংপ্রাপ্তযে কৃষ্ণং নমামি যদুপুংগবম্ ॥ 4 ॥

পুত্রকামেষ্টিফলদং কংজাক্ষং কমলাপতিম্ ।
দেবকীনংদনং বংদে সুতসংপ্রাপ্তযে মম ॥ 5 ॥

পদ্মাপতে পদ্মনেত্র পদ্মনাভ জনার্দন ।
দেহি মে তনযং শ্রীশ বাসুদেব জগত্পতে ॥ 6 ॥

যশোদাংকগতং বালং গোবিংদং মুনিবংদিতম্ ।
অস্মাকং পুত্র লাভায নমামি শ্রীশমচ্যুতম্ ॥ 7 ॥

শ্রীপতে দেবদেবেশ দীনার্তির্হরণাচ্যুত ।
গোবিংদ মে সুতং দেহি নমামি ত্বাং জনার্দন ॥ 8 ॥

ভক্তকামদ গোবিংদ ভক্তরক্ষ শুভপ্রদ ।
দেহি মে তনযং কৃষ্ণ রুক্মিণীবল্লভ প্রভো ॥ 9 ॥

রুক্মিণীনাথ সর্বেশ দেহি মে তনযং সদা ।
ভক্তমংদার পদ্মাক্ষ ত্বামহং শরণং গতঃ ॥ 10 ॥

দেবকীসুত গোবিংদ বাসুদেব জগত্পতে ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 11 ॥

বাসুদেব জগদ্বংদ্য শ্রীপতে পুরুষোত্তম ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 12 ॥

কংজাক্ষ কমলানাথ পরকারুণিকোত্তম ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 13 ॥

লক্ষ্মীপতে পদ্মনাভ মুকুংদ মুনিবংদিত ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 14 ॥

কার্যকারণরূপায বাসুদেবায তে সদা ।
নমামি পুত্রলাভার্থং সুখদায বুধায তে ॥ 15 ॥

রাজীবনেত্র শ্রীরাম রাবণারে হরে কবে ।
তুভ্যং নমামি দেবেশ তনযং দেহি মে হরে ॥ 16 ॥

অস্মাকং পুত্রলাভায ভজামি ত্বাং জগত্পতে ।
দেহি মে তনযং কৃষ্ণ বাসুদেব রমাপতে ॥ 17 ॥

শ্রীমানিনীমানচোর গোপীবস্ত্রাপহারক ।
দেহি মে তনযং কৃষ্ণ বাসুদেব জগত্পতে ॥ 18 ॥

অস্মাকং পুত্রসংপ্রাপ্তিং কুরুষ্ব যদুনংদন ।
রমাপতে বাসুদেব মুকুংদ মুনিবংদিত ॥ 19 ॥

বাসুদেব সুতং দেহি তনযং দেহি মাধব ।
পুত্রং মে দেহি শ্রীকৃষ্ণ বত্সং দেহি মহাপ্রভো ॥ 20 ॥

ডিংভকং দেহি শ্রীকৃষ্ণ আত্মজং দেহি রাঘব ।
ভক্তমংদার মে দেহি তনযং নংদনংদন ॥ 21 ॥

নংদনং দেহি মে কৃষ্ণ বাসুদেব জগত্পতে ।
কমলানাথ গোবিংদ মুকুংদ মুনিবংদিত ॥ 22 ॥

অন্যথা শরণং নাস্তি ত্বমেব শরণং মম ।
সুতং দেহি শ্রিযং দেহি শ্রিযং পুত্রং প্রদেহি মে ॥ 23 ॥

যশোদাস্তন্যপানজ্ঞং পিবংতং যদুনংদনম্ ।
বংদেঽহং পুত্রলাভার্থং কপিলাক্ষং হরিং সদা ॥ 24 ॥

নংদনংদন দেবেশ নংদনং দেহি মে প্রভো ।
রমাপতে বাসুদেব শ্রিযং পুত্রং জগত্পতে ॥ 25 ॥

পুত্রং শ্রিযং শ্রিযং পুত্রং পুত্রং মে দেহি মাধব ।
অস্মাকং দীনবাক্যস্য অবধারয শ্রীপতে ॥ 26 ॥

গোপাল ডিংভ গোবিংদ বাসুদেব রমাপতে ।
অস্মাকং ডিংভকং দেহি শ্রিযং দেহি জগত্পতে ॥ 27 ॥

মদ্বাংছিতফলং দেহি দেবকীনংদনাচ্যুত ।
মম পুত্রার্থিতং ধন্যং কুরুষ্ব যদুনংদন ॥ 28 ॥

যাচেঽহং ত্বাং শ্রিযং পুত্রং দেহি মে পুত্রসংপদম্ ।
ভক্তচিংতামণে রাম কল্পবৃক্ষ মহাপ্রভো ॥ 29 ॥

আত্মজং নংদনং পুত্রং কুমারং ডিংভকং সুতম্ ।
অর্ভকং তনযং দেহি সদা মে রঘুনংদন ॥ 30 ॥

বংদে সংতানগোপালং মাধবং ভক্তকামদম্ ।
অস্মাকং পুত্রসংপ্রাপ্ত্যৈ সদা গোবিংদমচ্যুতম্ ॥ 31 ॥

ওংকারযুক্তং গোপালং শ্রীযুক্তং যদুনংদনম্ ।
ক্লীংযুক্তং দেবকীপুত্রং নমামি যদুনাযকম্ ॥ 32 ॥

বাসুদেব মুকুংদেশ গোবিংদ মাধবাচ্যুত ।
দেহি মে তনযং কৃষ্ণ রমানাথ মহাপ্রভো ॥ 33 ॥

রাজীবনেত্র গোবিংদ কপিলাক্ষ হরে প্রভো ।
সমস্তকাম্যবরদ দেহি মে তনযং সদা ॥ 34 ॥

অব্জপদ্মনিভ পদ্মবৃংদরূপ জগত্পতে ।
দেহি মে বরসত্পুত্রং রমানাযক মাধব ॥ 35 ॥

নংদপাল ধরাপাল গোবিংদ যদুনংদন ।
দেহি মে তনযং কৃষ্ণ রুক্মিণীবল্লভ প্রভো ॥ 36 ॥

দাসমংদার গোবিংদ মুকুংদ মাধবাচ্যুত ।
গোপাল পুংডরীকাক্ষ দেহি মে তনযং শ্রিযম্ ॥ 37 ॥

যদুনাযক পদ্মেশ নংদগোপবধূসুত ।
দেহি মে তনযং কৃষ্ণ শ্রীধর প্রাণনাযক ॥ 38 ॥

অস্মাকং বাংছিতং দেহি দেহি পুত্রং রমাপতে ।
ভগবন্ কৃষ্ণ সর্বেশ বাসুদেব জগত্পতে ॥ 39 ॥

রমাহৃদযসংভার সত্যভামামনঃপ্রিয ।
দেহি মে তনযং কৃষ্ণ রুক্মিণীবল্লভ প্রভো ॥ 40 ॥

চংদ্রসূর্যাক্ষ গোবিংদ পুংডরীকাক্ষ মাধব ।
অস্মাকং ভাগ্যসত্পুত্রং দেহি দেব জগত্পতে ॥ 41 ॥

কারুণ্যরূপ পদ্মাক্ষ পদ্মনাভসমর্চিত ।
দেহি মে তনযং কৃষ্ণ দেবকীনংদনংদন ॥ 42 ॥

দেবকীসুত শ্রীনাথ বাসুদেব জগত্পতে ।
সমস্তকামফলদ দেহি মে তনযং সদা ॥ 43 ॥

ভক্তমংদার গংভীর শংকরাচ্যুত মাধব ।
দেহি মে তনযং গোপবালবত্সল শ্রীপতে ॥ 44 ॥

শ্রীপতে বাসুদেবেশ দেবকীপ্রিযনংদন ।
ভক্তমংদার মে দেহি তনযং জগতাং প্রভো ॥ 45 ॥

জগন্নাথ রমানাথ ভূমিনাথ দযানিধে ।
বাসুদেবেশ সর্বেশ দেহি মে তনযং প্রভো ॥ 46 ॥

শ্রীনাথ কমলপত্রাক্ষ বাসুদেব জগত্পতে ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 47 ॥

দাসমংদার গোবিংদ ভক্তচিংতামণে প্রভো ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 48 ॥

গোবিংদ পুংডরীকাক্ষ রমানাথ মহাপ্রভো ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 49 ॥

শ্রীনাথ কমলপত্রাক্ষ গোবিংদ মধুসূদন ।
মত্পুত্রফলসিদ্ধ্যর্থং ভজামি ত্বাং জনার্দন ॥ 50 ॥

স্তন্যং পিবংতং জননীমুখাংবুজং
বিলোক্য মংদস্মিতমুজ্জ্বলাংগম্ ।
স্পৃশংতমন্যস্তনমংগুলীভিঃ
বংদে যশোদাংকগতং মুকুংদম্ ॥ 51 ॥

যাচেঽহং পুত্রসংতানং ভবংতং পদ্মলোচন ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 52 ॥

অস্মাকং পুত্রসংপত্তেশ্চিংতযামি জগত্পতে ।
শীঘ্রং মে দেহি দাতব্যং ভবতা মুনিবংদিত ॥ 53 ॥

বাসুদেব জগন্নাথ শ্রীপতে পুরুষোত্তম ।
কুরু মাং পুত্রদত্তং চ কৃষ্ণ দেবেংদ্রপূজিত ॥ 54 ॥

কুরু মাং পুত্রদত্তং চ যশোদাপ্রিযনংদন ।
মহ্যং চ পুত্রসংতানং দাতব্যং ভবতা হরে ॥ 55 ॥

বাসুদেব জগন্নাথ গোবিংদ দেবকীসুত ।
দেহি মে তনযং রাম কৌসল্যাপ্রিযনংদন ॥ 56 ॥

পদ্মপত্রাক্ষ গোবিংদ বিষ্ণো বামন মাধব ।
দেহি মে তনযং সীতাপ্রাণনাযক রাঘব ॥ 57 ॥

কংজাক্ষ কৃষ্ণ দেবেংদ্রমংডিত মুনিবংদিত ।
লক্ষ্মণাগ্রজ শ্রীরাম দেহি মে তনযং সদা ॥ 58 ॥

দেহি মে তনযং রাম দশরথপ্রিযনংদন ।
সীতানাযক কংজাক্ষ মুচুকুংদবরপ্রদ ॥ 59 ॥

বিভীষণস্য যা লংকা প্রদত্তা ভবতা পুরা ।
অস্মাকং তত্প্রকারেণ তনযং দেহি মাধব ॥ 60 ॥

ভবদীযপদাংভোজে চিংতযামি নিরংতরম্ ।
দেহি মে তনযং সীতাপ্রাণবল্লভ রাঘব ॥ 61 ॥

রাম মত্কাম্যবরদ পুত্রোত্পত্তিফলপ্রদ ।
দেহি মে তনযং শ্রীশ কমলাসনবংদিত ॥ 62 ॥

রাম রাঘব সীতেশ লক্ষ্মণানুজ দেহি মে ।
ভাগ্যবত্পুত্রসংতানং দশরথাত্মজ শ্রীপতে ॥ 63 ॥

দেবকীগর্ভসংজাত যশোদাপ্রিযনংদন ।
দেহি মে তনযং রাম কৃষ্ণ গোপাল মাধব ॥ 64 ॥

কৃষ্ণ মাধব গোবিংদ বামনাচ্যুত শংকর ।
দেহি মে তনযং শ্রীশ গোপবালকনাযক ॥ 65 ॥

গোপবাল মহাধন্য গোবিংদাচ্যুত মাধব ।
দেহি মে তনযং কৃষ্ণ বাসুদেব জগত্পতে ॥ 66 ॥

দিশতু দিশতু পুত্রং দেবকীনংদনোঽযং
দিশতু দিশতু শীঘ্রং ভাগ্যবত্পুত্রলাভম্ ।
দিশতু দিশতু শ্রীশো রাঘবো রামচংদ্রো
দিশতু দিশতু পুত্রং বংশবিস্তারহেতোঃ ॥ 67 ॥

দীযতাং বাসুদেবেন তনযোমত্প্রিযঃ সুতঃ ।
কুমারো নংদনঃ সীতানাযকেন সদা মম ॥ 68 ॥

রাম রাঘব গোবিংদ দেবকীসুত মাধব ।
দেহি মে তনযং শ্রীশ গোপবালকনাযক ॥ 69 ॥

বংশবিস্তারকং পুত্রং দেহি মে মধুসূদন ।
সুতং দেহি সুতং দেহি ত্বামহং শরণং গতঃ ॥ 70 ॥

মমাভীষ্টসুতং দেহি কংসারে মাধবাচ্যুত ।
সুতং দেহি সুতং দেহি ত্বামহং শরণং গতঃ ॥ 71 ॥

চংদ্রার্ককল্পপর্যংতং তনযং দেহি মাধব ।
সুতং দেহি সুতং দেহি ত্বামহং শরণং গতঃ ॥ 72 ॥

বিদ্যাবংতং বুদ্ধিমংতং শ্রীমংতং তনযং সদা ।
দেহি মে তনযং কৃষ্ণ দেবকীনংদন প্রভো ॥ 73 ॥

নমামি ত্বাং পদ্মনেত্র সুতলাভায কামদম্ ।
মুকুংদং পুংডরীকাক্ষং গোবিংদং মধুসূদনম্ ॥ 74 ॥

ভগবন্ কৃষ্ণ গোবিংদ সর্বকামফলপ্রদ ।
দেহি মে তনযং স্বামিন্ ত্বামহং শরণং গতঃ ॥ 75 ॥

স্বামিন্ ত্বং ভগবন্ রাম কৃষ্ণ মাধব কামদ ।
দেহি মে তনযং নিত্যং ত্বামহং শরণং গতঃ ॥ 76 ॥

তনযং দেহি গোবিংদ কংজাক্ষ কমলাপতে ।
সুতং দেহি সুতং দেহি ত্বামহং শরণং গতঃ ॥ 77 ॥

পদ্মাপতে পদ্মনেত্র প্রদ্যুম্নজনক প্রভো ।
সুতং দেহি সুতং দেহি ত্বামহং শরণং গতঃ ॥ 78 ॥

শংখচক্রগদাখড্গশারংগপাণে রমাপতে ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 79 ॥

নারাযণ রমানাথ রাজীবপত্রলোচন ।
সুতং মে দেহি দেবেশ পদ্মপদ্মানুবংদিত ॥ 80 ॥

রাম মাধব গোবিংদ দেবকীবরনংদন ।
রুক্মিণীনাথ সর্বেশ নারদাদিসুরার্চিত ॥ 81 ॥

দেবকীসুত গোবিংদ বাসুদেব জগত্পতে ।
দেহি মে তনযং শ্রীশ গোপবালকনাযক ॥ 82 ॥

মুনিবংদিত গোবিংদ রুক্মিণীবল্লভ প্রভো ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 83 ॥

গোপিকার্জিতপংকেজমরংদাসক্তমানস ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 84 ॥

রমাহৃদযপংকেজলোল মাধব কামদ ।
মমাভীষ্টসুতং দেহি ত্বামহং শরণং গতঃ ॥ 85 ॥

বাসুদেব রমানাথ দাসানাং মংগলপ্রদ ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 86 ॥

কল্যাণপ্রদ গোবিংদ মুরারে মুনিবংদিত ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 87 ॥

পুত্রপ্রদ মুকুংদেশ রুক্মিণীবল্লভ প্রভো ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 88 ॥

পুংডরীকাক্ষ গোবিংদ বাসুদেব জগত্পতে ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 89 ॥

দযানিধে বাসুদেব মুকুংদ মুনিবংদিত ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 90 ॥

পুত্রসংপত্প্রদাতারং গোবিংদং দেবপূজিতম্ ।
বংদামহে সদা কৃষ্ণং পুত্রলাভপ্রদাযিনম্ ॥ 91 ॥

কারুণ্যনিধযে গোপীবল্লভায মুরারযে ।
নমস্তে পুত্রলাভার্থং দেহি মে তনযং বিভো ॥ 92 ॥

নমস্তস্মৈ রমেশায রুক্মিণীবল্লভায তে ।
দেহি মে তনযং শ্রীশ গোপবালকনাযক ॥ 93 ॥

নমস্তে বাসুদেবায নিত্যশ্রীকামুকায চ ।
পুত্রদায চ সর্পেংদ্রশাযিনে রংগশাযিনে ॥ 94 ॥

রংগশাযিন্ রমানাথ মংগলপ্রদ মাধব ।
দেহি মে তনযং শ্রীশ গোপবালকনাযক ॥ 95 ॥

দাসস্য মে সুতং দেহি দীনমংদার রাঘব ।
সুতং দেহি সুতং দেহি পুত্রং দেহি রমাপতে ॥ 96 ॥

যশোদাতনযাভীষ্টপুত্রদানরতঃ সদা ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 97 ॥

মদিষ্টদেব গোবিংদ বাসুদেব জনার্দন ।
দেহি মে তনযং কৃষ্ণ ত্বামহং শরণং গতঃ ॥ 98 ॥

নীতিমান্ ধনবান্ পুত্রো বিদ্যাবাংশ্চ প্রজাপতে ।
ভগবংস্ত্বত্কৃপাযাশ্চ বাসুদেবেংদ্রপূজিত ॥ 99 ॥

যঃ পঠেত্ পুত্রশতকং সোঽপি সত্পুত্রবান্ ভবেত্ ।
শ্রীবাসুদেবকথিতং স্তোত্ররত্নং সুখায চ ॥ 100 ॥

জপকালে পঠেন্নিত্যং পুত্রলাভং ধনং শ্রিযম্ ।
ঐশ্বর্যং রাজসম্মানং সদ্যো যাতি ন সংশযঃ ॥ 101 ॥

✧˳·····°*❋ ❋*°·····˳✧